# Shri Kalabhairava Stotram

# શ્રીકાલભૈરવસ્તોત્રમ્

## Document Information

Text title : kAlabhairavastotram

File name : kAlabhairavastotram.itx

Category : devii, devI

Location : doc_devii

Proofread by : NA

Latest update : January 27, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2021

*sanskritdocuments.org*

Shri Kalabhairava Stotram

# શ્રીકાલભૈરવસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
દેવાઃ ઉચુઃ ।
નમો ભૈરવદેવાય નિત્યયાનન્દમૂર્તયે ।
વિધિશાસ્ત્રાન્તમાર્ગાય વેદશાસ્ત્રાર્થદર્શિને ॥ ૧॥

દિગમ્બરાય કાલાય નમઃ ખટ્વાઙ્ગધારિણે ।
વિભૂતિવિલસદ્ભાલનેત્રાયાર્ધેન્દુમાલને ॥ ૨॥

કુમારપ્રભવે તુભ્યં બટુકાયમહાત્મને ।
નમોઽચિન્ત્યપ્રભાવાય ત્રિશૂલાયુધધારિણે ॥ ૩॥

નમઃ ખડ્ગમહાધારહૃત ત્રૈલોક્યભીતયે ।
પૂરિતવિશ્વવિશ્વાય વિશ્વપાલાય તે નમઃ ॥ ૪॥

ભૂતાવાસાય ભૂતાય ભૂતાનાં પતયે નમ ।
અષ્ટમૂર્તે નમસ્તુભ્યં કાલકાલાય તે નમઃ ॥ ૫॥

કં કાલાયાતિઘોરાય ક્ષેત્રપાલાય કામિને ।
કલાકાષ્ટાદિરૂપાય કાલાય ક્ષેત્રવાસિને ॥ ૬॥

નમઃ ક્ષેત્રજિતે તુભ્યં વિરાજે જ્ઞાનશાલને ।
વિદ્યાનાં ગુરવે તુભ્યં વિધિનાં પતયે નમઃ ॥ ૭॥

નમઃ પ્રપઞ્ચદોર્દણ્ડ દૈત્યદર્પવિનાશને ।
નિજભક્ત જનોદ્દામ હર્ષપ્રવરદાયિને ॥ ૮॥

નમો જમ્ભારિમુખ્યાય નામૈશ્વર્યાષ્ટદાયિને ।
અનન્તદુઃખસંસારપારાવારાન્તદર્શિને ॥ ૯॥

નમો જમ્ભાય મોહાય દ્વેષાયોચ્ચાટકારિણે ।
વશઙ્કરાય રાજન્યમૌલન્યસ્ત નિજાન્ઘ્રયે ॥ ૧૦॥

નમો ભક્તાપદાં હન્ત્રે સ્મૃતિમાત્રાર્થદર્શિને ।
આનન્દમૂર્તયે તુભ્યં શ્મશાનનિલયાય તે ॥ ૧૧॥

વેતાલભૂતકૂષ્માણ્ડ ગ્રહસેવાવિલાસિને ।
દિગમ્બરાય મહતે પિશાચાકૃતિશાલને ॥ ૧૨॥

નમોબ્રહ્માદિભિર્વન્દ્ય પદરેણુવરાયુષે ।
બ્રહ્માદિગ્રાસદક્ષાય નિઃફલાય નમો નમઃ ॥ ૧૩॥

નમઃ કાશીનિવાસાય નમો દણ્ડકવાસિને ।
નમોઽનન્ત પ્રબોધાય ભૈરવાય નમોનમઃ ॥ ૧૪॥

ઇતિ શ્રીકાલભૈરવસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Shri Kalabhairava Stotram*
pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*